## अनुदात्तं प्रश्नान्ताभिपूजितयोः । (१००/३६१९)

अनुदात्तः प्लुतो भवति प्रश्नान्ते, अभिपूजिते च[1] । अगम३ः पूर्वा३न् ग्रामा३न्[2] अग्निभूता३इ, पटा३उ? अग्निभूते, पटो इत्येतयोः प्रश्नान्ते वर्तमानयोः अनुदात्तः प्लुतो भवति । अगमः इत्येवमादीनां तु 'अनन्त्यस्यापि प्रश्नाख्यानयोः' (८.२.१०५/३६२४) इति स्वरितः प्लुतो भवति । अभिभूजिते – शोभनः खल्वसि माणवक३ ॥

## चिदिति चोपमार्थे प्रयुज्यमाने । (१०१/३६२०)

[2]अनुदात्तम् इति वर्तते । चित् इत्येतस्मिन् निपाते उपमार्थे प्रयुज्यमाने वाक्यस्य टेः अनुदात्तः प्लुतो भवति । [3]प्लुतोऽप्यत्र विधीयते, न गुणमात्रम् । अग्निचिद् [4]भाया३त् । राजचिद् [5]भाया३त् । [6]अग्निरिव भायात्, राजेव भायात् इत्यर्थः । उपमार्थे इति किम् ? कथञ्चिद् आहुः । प्रयुज्यमाने इति किम् ? अग्निर्माणवको भायात् ॥

## उपरिस्विदासीदिति च । (१०२/३६२१)

अनुदात्तम् इति वर्तते । उपरिस्विदासीत् इत्येतस्य टेः अनुदात्तः प्लुतो भवति । 'अधः स्विदासी३त् उपरि स्विदासी३त्' (तै. ब्रा. २.८.९५) । अधः स्विदासीद् इत्यत्र 'विचार्यमाणानाम्' (८.२.९७/३६१६) इति उदात्तः प्लुतः, उपरि स्विदासीत् इत्यत्र तु अनेनानुदात्तः[7] ॥

## स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु । (१०३/३६२२)

स्वरितः प्लुतो भवति आम्रेडिते परतः असूयायाम्, सम्मतौ, कोपे, कुत्सने च गम्यमाने । [8]'वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु' (८.१.८/२१४३) इति द्विर्वचनमुक्तम्, तत्रायं प्लुतविधिः । [9]असूयायां [10]तावत् – 'माणवक३ माणवक, अभिरूपक३ अभिरूपक, रिक्तं त आभिरूप्यम् । [11]सम्मतौ – माणवक३ माणवक, अभिरूपक३ अभिरूपक, शोभनः खल्वसि । कोपे – माणवक३ माणवक, अविनीतक३ अविनीतक, इदानीं ज्ञास्यसि जाल्म । कुत्सने – शाक्तीक३ शाक्तीक, याष्टीक३ याष्टीक, रिक्ता ते शक्तिः ॥

[९३१] असूयादिषु वावचनं कर्तव्यम् । (म. भा. ३.४२०)

माणवक माणवक इत्येवमाद्यपि यथा स्यात् ॥

---

1. नानेन प्लुतो विधीयते किन्तु दूराद्धूतादिषु विहितस्यानन्त्यस्यापि प्रश्नाख्यानयोः स्वरितप्लुतस्य अनुदात्तत्वं गुणमात्रं विधीयते इत्यधिकम् ड. ब. ह. 2. अनुदात्तः क. 3. वाक्यमिदं नास्ति क. 4–5. भवान् क. 6. अग्निरिव राजेव भवान् भूयात् इत्यर्थः क. 7. प्लुतः इत्यधिकम् ब. ह. 8. वाक्यमिदं नास्ति इ. 9. असूयायांतावत् नास्ति ब. 10. तावत् नास्ति इ. 11. सम्मतौ नास्ति इ.